# श्रीमद्भगवद्गीतायां ज्ञानकर्मभक्त्यानां महत्त्वम्

**लक्ष्मी**

सहायक प्रवक्ता, राजीव गांधी राजकीय महिला महाविद्यालय, भिवानी (हरियाणा)

E-mail : lakshmibiran27@gmail-com;

**प्रस्तावना –**

श्रीमद्भगवद्गीता संस्कृत साहित्यस्य अनुपमेय एवं एकं देदीप्यमानं रत्नं विद्यते। यस्य कोऽपि शब्दः सदुपदे"ोन रिक्तं नास्ति। अयं ग्रन्थः महाभारतस्य भीष्मपर्वणि सुगुम्फिता वर्तते। नितान्त सरलसुबोधशैल्यां इदं ग्रन्थरत्नं न विरचितं अपितु सम्पूर्ण जगतो अमूल्य सांस्कृतिक निधिरूपेण स्वीक्रियते। आजीवनं निरन्तरभ्यासेन अस्य ग्रन्थस्य समाप्तिर्नास्ति। अद्यत्वे समाजे सर्वासु दिक्षु मानवमूल्यानाम्, आदर्शानां निरन्तरमेव ह्रासः परिलक्ष्यते, धनादिकदृष्ट्या तु वयं सम्पन्नतामनुभवामः परन्तु यस्य कृते एतेषां सर्वेषामेव सङ्ग्रहं कुर्मः, तस्य तु सर्वथैव अभावः परिलक्ष्यते, यदि वयं सर्वेषां प्रयत्नानां प्रयासानां वा विश्लेषणं कुर्मः, तदा इदं हि स्पष्टी भविष्यति यत् सर्वे सुखाय एव सर्वाणि अपि कार्याणि कुर्मः। प्रयासस्तु अनवरतगत्या चलति, परञ्च न तदनुरूपं फलमिति वीक्ष्य नूनं नैराश्यप्राप्तिः। अद्यत्वे वयं याभिरपि समस्याभिः ग्रस्ताः न ताभ्यो मुक्तेरुपायः समस्यानां समाधानं श्रीकृष्णस्य श्रीमुखवाणी स्वरूपायां श्रीमद्भगवद्गीतायां स्पष्टरूपेणैव परिलक्ष्यते। प्रत्यहं नवाः नवाः भावाः उद्भूयन्ते, अनेनायं सदैव नूतनो विद्यते एवम् एकाग्रीभूय श्रद्धया, भक्त्या, विचारविनिमयेन अस्य पदे–पदे परमरहस्यं प्रत्यक्ष जायते।

भारतीयचिन्तने वैदिककालस्य कर्मं, उपनिषदां ज्ञानं, वेदानां च भक्तिः इत्येताः तिस्रो धाराः सन्ति। एतासामपि परस्पर पूरकता गीतया प्रतिपाद्यते। गीतायाः समन्वय सूत्रम् एतदस्ति यत् सर्वे सम्प्रदायाः सिद्धान्ताश्च समीचीनाः सन्ति। गीतायां कर्मयोगे, ज्ञानयोगे, भक्तियोगे कथ्यते यत् –

कर्मयोगः –

अद्यत्वे समाजे प्रथितानां सर्वासामपि समस्यानां मूले कारणभूतमस्ति असत् विचारः, असत् भाषणः, असत् कर्म वापि । एतत् समाधानार्थमपि अद्यत्वेऽपि गीता –

१ ''नित्यं कर्म समाचर''

२ ''योगः कर्मसु कौशलम् ''

३ ''योगस्थः कुरु कर्माणि ''

इत्यादि वाक्यैः अन्तः करणं निर्मलीकरोति।

गीता वर्तमानयुगस्य हतोत्साहित मानवस्य मनसि उद्यममुत्पाद्य हृदयस्थां दुर्बलताञ्च दूरीकरोति। यदा अर्जुनो युद्धमुखात् युद्धात् पलायितुमिच्छति तदा तस्मिन् विषमे काले मनसो दौर्बल्यमपाकर्तुं कथयति –

क्लैव्यं मा स्म गमः पार्थ नैत्वय्युपपद्यते।

क्षुद्रं हृदयदौर्बल्यं व्यक्त्वोत्तिष्ठ परंतप॥ ४

कर्मविषये उपदिशन् कथयति –

''तस्माद युध्यस्व भारत '' ५,

''तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय '' ६

सततं कार्यकरणाय कथयति –

''तस्मादसक्तः सततं कार्यं समाचर '' ७

''युध्यस्व विगतज्वरः ''८

''युध्यस्व जेतासि रणे सपत्नान् '' ६।

मनुष्यैः सदा निष्कामभावनया कर्म करणीयम्। कर्म कदापि न त्याज्यम्।

''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्व कर्मणि ॥ १० ''

'' नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।

शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥ ११ ''

वयं मानवाः कर्म तु न्यूनं कुर्मः फलस्येच्छाऽधिको भवति अप्राप्ते पुनः दुःखमेव। अत एवात्र कथ्यते यत् अलं सर्वदैव कर्म कर्तव्यं न फलस्य चिन्ता कर्तव्या यतो हि वयं यदपि कुर्मः स फलवान् भवत्येव यतो हि अयमेव संसारनियमः।

''अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। '' १२

इमाः सर्वाः जीवनस्य कर्मयोगं वर्णयन्ति।

ज्ञानयोगः –

अयमात्मा अजरोऽमरश्चास्ति। नायं जायते न च म्रियते। केनापि प्रकारेण नायं नाशं प्राप्नोति। यथा – जीर्णवस्त्रमुत्तार्य नवं वस्त्रं धार्यते, तथैव नवशरीरधारणमस्ति। यथा –

''अजो नित्यो शाश्वतो ऽयं पुराणो

न हन्यते हन्यमाने शरीरे ॥ १३

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।

न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥ १४

वासांसि जीर्णानि यथा विहाय

नवानि गृह्णाति नरोपराणि ।

तथा शरीराणि विहाय जीर्णानि

अन्यानि संयाति नवानि देही ॥१५

कठोपनिषत्स्वपि – '' न जायते म्रियते वा विपश्चित् '' १६

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे । १७

ज्ञानवान् मनुष्यः सम्पूर्ण सृष्ट्यां सच्चिदानन्द स्वरूपम् ईश्वरं पश्यति। ज्ञानरूपया नौकायां स्थित्वा पापानां सागरात् तरति। शुद्धान्तःकरणेन भगवद्प्राप्तिरूपां परामशान्तिं प्राप्नोति।

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।

सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥ १८

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥१६

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥ २०

भक्तियोगः –

साक्षात् पद्मनाभस्य मुखपद्मात् निस्सरिता भगवद्गीता भक्तिरहस्यापि सारः। भक्तिचिन्तनेऽपि गीता परस्परविरोधि सिद्धान्तानां समन्वयं विदधाति। तथा हि द्वादशाध्याये स्पष्टमुल्लिखितं यत् साकारनिराकारस्य च भेदो निरर्थको यतोहि अन्ततः सर्वाणि निरूपाणि एकस्यैव तत्त्वस्य सन्ति। साम्प्रदायिक विद्वेषमयपरिपूर्णे

अद्यतन परिवेशे गीतायां प्रोक्तं यत् –

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।

श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥ २१

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।

तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२२

यः मनुष्यः सुखदुःखयोः हानिलाभयोः मानापमानयोः शत्रुतामित्रयोः समे तिष्ठति, जीवनस्य समविषम परिस्थितिषु ईश्वरस्य प्रसादं मत्वा सच्चिदानदस्वरूपं ईश्वरं सर्वत्र पश्यति, सैव परमभक्तोऽस्ति। ईदृशः भक्तः मम प्रियोऽस्ति।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।

शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः॥ २३

समः शत्रौ च मित्रे च तथा मानापमानयोः ।

शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ २४

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ।

अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥ २५

येतु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।

श्रद्दधाना मत्परमा भक्तास्ते ऽतीव मे प्रियाः ॥ २६

भक्तिमार्गेऽपि सर्वजटिलताः परिहृत्य सर्वोपचारिकतां दूरीकृत्य स्नेहस्य मार्गं गीता प्रसारयति।

**निष्कर्षः** –

मनोवैज्ञानिक कष्टानां निवारणाय गीतायाः सिद्धान्ता अवलम्ब्यन्ते। मानवजीवनस्य पूर्णता कर्मज्ञान भक्तीनां सामञ्जस्ये निहितमस्ति। भगवता श्रीकृष्णेन अर्जुनमाध्यमेन संपूर्णजीवजगतः आत्मोत्थानाय मार्गं प्रदर्शितम्। गीता निःशंकया कुरुक्षेत्रस्य युद्धभूमौ प्रदत्तः संदेशोऽस्ति। मम मतानुसारेण जीवनस्य संघर्षैः एव कुरुक्षेत्रस्य युद्धभूमेः स्वरूपोऽस्ति। जीवनोन्नतये गीताया उपदेशः मार्गदर्शकोऽस्ति । सर्वेषां सांसारिकजीवानां कर्त्तव्योऽस्ति यत् गीताया उपदेशाननुसृत्य जीवने उन्नतिः करणीया। अतएव गीतायाः पठनं – पाठनमपि सविशेषेण कर्त्तव्यम्। अपि च गीतादर्शने, लोकजीवने, आधुनिकसमये चाधुनिकसमस्यानां निवारणार्थं सर्वत्र महत्त्वपूर्ण भूमिकायाः निर्वाहः विधीयते। अतएव प्रोक्तम् –

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरै ः । .

या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥ २७

सन्दर्भ विवरणम् –

१. श्रीमद्भगवद्गीता,

२. श्रीमद्भगवद्गीता – २ . ५०,

३ . तत्रैव – २ . ४८,

४. तत्रैव – २ . ३ ,

५. तत्रैव – २. १८,

६. तत्रैव – २ . ३७,

७. तत्रैव – ३ . १६,

८ . तत्रैव – ३. ३०,

९. तत्रैव – ११ . ३३ ,

१०. तत्रैव – ३. ४७,

११ . तत्रैव – ३ .८,

१२ . मनुस्मृतिः

१३ . तत्रैव – २ . २०,

१४ . तत्रैव – २. २३,

१५ . तत्रैव – २ . २२,

१६ . कठोपनिषद् – २ . १८ ,

१७ . कठोपनिषद् – २ .१६,

१८ . श्रीमद्भगवद्गीता – ४. ३७ ,

१६. तत्रैव – ४ . ३८ ,

२० . तत्रैव – ४ . ३६,

२१ . तत्रैव – १२ . २,

२२ . तत्रैव – ७ . २१,

२३ . तत्रैव – १२. १७,

२४ . तत्रैव – १२. १८ ,

२५ . तत्रैव – १२ .१६,

२६ . तत्रैव – १२ . २०,

२७ . तत्रैव – पृष्ठ संख्या २६ ।